**तिज** तीक्ष्णीकरणे, चुरा० उभ० सक० सेट्। तेजयति ते अतीतिजत् त। "कुसुमचापमतेजयदंशुभिर्हिमकरः" रघुः "तेजयित्वा तु तत्सैन्यम्" रामा० अर० ३१ स०। "तेजिता बलदर्पाभ्याम्" हरिवं०५२०८। "सा मयोक्तेन तेजिता" ९६४४ श्लो०। तेजः।

**तिज** क्षान्तौ क्षमायां स्वार्थे सन् निशाने न सन् भ्वा०आत्म० सक० सेट्। तितिक्षते तेजते। अतितितिक्षिष्ट अतेजिष्ट। "आगमापायिनोनित्यास्तांस्तितिक्षस्व भारत!" गीता "हिमं घृणिं तितिक्षिष्यते" शत० ब्रा० ३।१।२।१४। "अतिवादांस्तितिक्षेत" मनुः "आपस्ते पादं तितिक्षन्ता-मक्षमापस्तितिक्षितुम्" भा० शा० ८१७० श्लो० "तिति-क्षन्ते अभिशस्तिं जना नाम" ऋ० ३।३०।१।

**तिजिन** पु० तिज-इनच् किच्च। चन्द्रे उणा०।

**तिणिश** पु० तिल्वकवृक्षे लोध्रद्रुमे। "न्यग्रोधाश्वत्थतिल्वक-हरिद्रुमयोः" कात्या० श्रौ० सूत्रे "तिल्वकस्तिणिशः" कर्कः।

**तिण्टी** स्त्री विट्टति (तेओड़ी) शब्दच०।

**तितउ** पु० तन-डउ सन्वच्च डउ इति निर्देशात् न सन्धिः। १चालन्याम् अमरः। २छत्रे न० उज्ज्वलदत्तः।"क्षुद्रच्छिद्र-समोपेतं चालनं तितउ स्मृतमित्युक्तेरस्य क्लीवत्वमपि। "सक्तुमिव तितउना पुनन्तः" ऋ० १०।७१।२। "इमामृच-मधिकृत्य" निरु० ४।९। "तितउ परिपवनं भवति तत-वद्वा तुन्नवद्वातिलमात्रतुन्नमिति वा" अन्यथा निरुक्तिरुक्ता क्लीवत्वञ्चोक्तम्।

**तितिक्ष** त्रि० तिज-स्वार्थे सन्-अच्। १शीतोष्णादिद्वन्द्वसो-ढरि २ऋषिभेदे पु० तस्य गोत्रापत्यं गर्गा० यञ्। तै-तिक्ष्य तद्गोत्रापत्ये यून्यपत्ये यञन्तत्वात् फक्। तैति-क्षायण तद्गोत्रजे यून्यपत्ये पुंस्त्री०।

**तितिक्षा** स्त्री तिज-स्वार्थे सन् भावे अ। १क्षमायां शीतो-ष्णादिद्वन्द्वसहने "सहनं सर्वदुःखानामप्रतीकारपूर्वकम्। चिन्ताविलापरहितं सा तितिक्षा निगद्यते" विवेकचू०। सा संजाताऽस्य तार० इतच्। तितिक्षित क्षान्ते सोढरि जटाधरः।

**तितिक्षु** त्रि० तिज-स्वार्थे सन्-उ। तितिक्षाशीले।"शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावान् समाहितो भूत्वा आत्म-न्यात्मानमवलोकयेत्" वेदा० सा० धृता श्रुतिः।"अक्रोधनः क्रोधनेभ्यो विशिष्टस्तथा तितिक्षुरतितिक्षोर्विशिष्टः" भा० आ० ८७ अ०।

**तितिभ** पु०तितीति भणति भण-ड। इन्द्रगोपकीटे खद्योते हेमच०। [स्त्रियां जातित्वात् ङीष्।

**तितिर** पुंस्त्री० तित्तिरि+पृषो०। तित्तिरिखगे राजनि०

**तितिल** न० तिल-क बा० द्वित्वञ्च। १नन्दके (नान्दा) मृण्मये पात्रभेदे २तैतिलकरणे ३तिलपिष्टे च अजयपालः

**तित्तिर** पुंस्त्री तित्ति इति शब्दं रौति रु-बा० ड। (तितिर) खगभेदे शब्दर०। स्त्रियां जातित्वात् ङीष्। "कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सर्वशः" "तस्माद्वक्त्रा-द्विनिष्पेतुस्तित्तिरास्तस्य पाण्डव!" भा० उ० ८अ०।

**तित्तिरि** पु० तित्ति इति शब्दं रौति रु-बा० डि।(तितिर) खगभेदे अमरः। स्त्रियाममनुष्यजातित्वात् "इतोऽमनु-ष्यजातेः" पा० ङीप्। तित्तिरिः कृष्णवर्णः स्यात् स तु गौरः कपिञ्जलः। तित्तिरिर्वर्णदो ग्राही हिक्का-दोषत्रयापहः। श्वासकासज्वरहरस्तस्माद्गौरोऽधिको गुणैः" भाव०प्र०। तित्तिरिरूपग्रहणेन याज्ञवल्क्य-वान्तयजुर्ग्राहिणि मुनिभेदे तत्कथा "वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन्। यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम्। याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन्! कियत्। चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम्। इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया। विप्राव-मन्त्रा शिष्येण मदधीतं त्यजाश्विति। देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम्। ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान्। यजूंषि तित्तिरा भूत्वा तल्लो-लुपतयाऽऽददुः। तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः। भाग० १२।६ ५८।

तित्तिरिणा प्रोक्तमधीयते छण्। तैत्तिरीय तित्तिरिप्रोक्त-च्छन्दोब्राह्मणाध्येतृषु ब० व०। तित्तिरिणा अधीता छण्, ङीप्। तैत्तिरी कृष्णयजुःशाखायां स्त्री।

**तित्तिरीक** न०तित्तिरेः पक्षदाहेन जातम् वा०ईक। तित्ति-रिपक्षदाहेन जाते अञ्जनभेदे। "अञ्जनं तित्तिरीकञ्च नलदं पत्रमुत्पलम्" सुश्रु०। अत्र तिन्तिड़ीकमिति पाठा-न्तरम्। दग्धतिन्तिड़ीकजातेऽञ्जने इति तदर्थः।

**तिथ** पु० तिज-थक् नि० जलोपः।१वह्नौ २कामे च सि०कौ० ३काले त्रिका०। ४प्रावृट्काले संक्षिप्तसा०।

**तिथि(थी)** पुंस्त्री० अत-इथिन् पृषो० वा ङीप्। १पञ्चदशसु चन्द्रकलाक्रियारूपासु प्रतिपदादिषु, अमरः २पञ्चदश-सङ्ख्यायाञ्च। अस्य निरुक्त्यादिकं कालमाधवीये उक्तं यथा "अथ तिथयोनिर्णीयन्ते। तत्र तिथिशब्दस्तनोतेर्द्वी-